# श्री चंद्रलांबा सुप्रभात (प्रद्युम्नाचार्यकृत)

( १ )

श्री चंद्रले जगन्मातः पूर्वा संध्या प्रवर्तते ।
उत्तिष्ठ करुणापांगै । कर्तव्यं विश्वमंगलम् ।। १ ।।

श्रीसन्नति पूरीरत्न सिंहासन मधिष्ठिते ।
उत्तिष्ठ चंद्रलांबे त्वं नारायण मुनीडिते ।। २ ।।

शक्रादि सन्नुतपदामिह कृवितुं त्वां ।
गीर्वाणवृंदमखिलं सुमपागतोऽद्य ।
गायंत्यनन्यमनसा तव किर्तिगीतः ।
श्री चंद्रलांबा परमेश्वरि सुप्रभात् ।। ३ ।।

त्वत्पादुग्म भजनार्चनलब्धः सिद्धेः ।
नारायणार्थ मुनिवर्य सगाधिगम्या ।
हिंगूलपीठ णधिवस्य इहागतासि ।
श्री चंद्रलांब वरदे तव सुप्रभात ।। ४ ।।

भीमापगांबु परिकल्पित स्नातकर्मा ।
त्वद्दर्शनाय समुदेति सहस्त्रभानुः ।
नीलोत्पसाक्षि भव पार्वति सुप्रसन्न ।
श्रीचंद्रलांबा दयया तव सुप्रभातम् ।। ५ ।।

त्वा शंकरी सकलदेव समर्चनीयां ।
भीमातटे स्थितवती करूणास्वरूपाम् ।
धाताच्युत त्रिनयनाऽपि समेत्य भक्त्या ।
अर्चति अम्ब शुभदे तव सुप्रभातम् ।। ६ ।।

भीमापगा विमल नीर सुपूर्णकुंभैः ।
सद्योऽभिषेचनकृतिं मानपसा चिकीर्षोः ।
गायन्स्त्वदीय पद पंकज किर्तिगीतं ।
श्री चंद्रलेऽस्व नम उक्तिच सुप्रभातम् ।। ७ ।।

बिल्वादिपत्र नवचंपक पुष्पमालाः ।
श्रीरामचूत कदली फलपूरितांश्च ।
स्वीकार योग्य मधुपूरित हेम कुंभात् ।
आनीवतंत इह गायति सुप्रभातम् ।। ८ ।।

पापात्मनां दुरित हारिणि यद्दशैव ।
भीमापगा भवति धीमल ताशदक्षा ।
तां पादमूल परिपालित वत्यसिं त्वं ।
श्री चंद्रले परमसुंदरि सुप्रभातम् ।। ९ ।।

भीमा नदी विमलनीर तरंगरंग ।
रिंगत्सरोज कुलदिव्य सुगंध वाहः ।
अंगीकुरुष्व पवनो विदधाति सेवां ।
श्री चंद्रलांबा कृपया तव सुप्रभातम् ।। १० ।।

सेवा समुत्सुकमताः तव दर्शनार्थ ।
भक्त्या समाहितवतो इह त्वत्पदाब्जे ।
वैकुंठ लोकमपनीय इहागतां त्वां ।
स्तुवंति अम्ब वरदे तव सुप्रभातम् ।। ११ ।।

भोगप्रदा त्वमसि पार्वति मोक्षदाच ।
सर्वातिहारिणी समस्त सुखप्रदात्रि ।
त्वत्पादकाद्वय समाश्रित सर्व विद्याः ।
श्री चंद्रले विजयदे तव सुप्रभातम् ।। १२ ।।

त्वत्पादपद्म भवष्पद राशिभीतो ।
भीमापगा पतित सेतु निशाचरोऽयम् ।
पंचत्वमाप सुलभात्तव हि प्रकोपात् ।
श्री चंद्रलांब अरिमर्दिनि सुप्रभातम् ।। १३ ।।

सृष्टि स्थिति प्रलय कारिणि मंगलेत्वं ।
आम्नाय पीठ परिपालन तत्परा वैं ।
संसेवितुंच भजकास्म मुपस्थिताश्च ।
श्री चंद्रले हरसहोदरि सुप्रभातम् ।। १४ ।।

पद्माक्षि पद्ममुख पद्ममवादि वंद्ये ।
पद्मासतेऽखिल वराभव पाणिपद्मे ।
हृत्पंद्पीठ मधितिष्ठ ममापि मातः ।
श्री चंद्रले करूणया तव सुप्रभातम् ।। १५ ।।

मंगलं चंद्रला देवी मंगलं देव वंदिते ।
मंगलं कुरु सर्वेभ्यो मंगलं विश्वमंगलम् ।। १६ ।।

ये सुप्रभात मिदमाश्रित वत्सलायाः ।
श्रद्धावितां प्रतिदिनं हृदि चंद्रलायाः ।
प्रातः पठंति मनुजाः भुविसौख्यकामाः ।
ते प्राप्नुर्वति सुजना स्सकलानभीष्टान् ।। १७ ।।

( २ )

चंद्रलांबा जगन्मातः नारायण मुनीडिते ।
सन्नतिस्थान विख्यात वरदे शोकवारिणी ।। १ ।।
मंगले त्रिजगद्वंद्ये विष्णुवक्षस्थकालये ।
चंद्रला रक्षणार्थाय सेतुराज विनाशिनी ।। २ ।।

सिद्धबुद्धिप्रदे देवि भीमातीर निवासिनी ।
रविनाडयगतेभद्रे महामहिमरूपिणी ।। ३ ।।

पद्मासनस्थिते देवि शंखचक्रगदाधरे ।
विराजिता भयकरे सर्व संपत्प्रदायने ।। ४ ।।

किरीट हार केयूर नुपरांगदभूषिते ।
बालार्क सद्दशाकारे शुद्ध जांबूनदप्रभे ।। ५ ।।

भक्ताभीष्टप्रदे देवि सदा संजात संस्तुते ।
मंत्रमूर्ते महाशक्ते सुखदेव्यक्त स्वरूपिणी ।। ६ ।।

विष्णुप्रिये रत्नगर्भे शुद्धविज्ञानदायिनी ।
आद्यंत रहिले लक्ष्मी सर्वाद्यौघ विनाशिनी ।। ७ ।।

संततं चिंतये दुर्गे दात्रि कल्याण वर्धिनी ।
गीर्वाण संस्तुते देवि भुक्ति मुक्ति प्रदायिनी ।। ८ ।।

देवि देवि महाशक्ते सदा मच्चित्त वासिनी ।
क्षीराब्धि मथनो भूते नारायणी नमोस्तुते ।। ९ ।।

सर्वाभयकरे देवि सर्वव मंत्र स्वरूपिणी ।
सर्वतंत्रे महामाये सर्वेभ्यो मंगलं कुरू ।। १० ।।

(३)

पूर्णेंदू वक्त्यां नतकामदोग्ध्रीं ।
हिरण्यवर्णा श्रुतगीत किर्तिम् ।
आसेचनांगी सरवृंद सेव्यां ।
श्री चंद्रलांबा मनसा स्मरामि ॥ १ ||

निवास योग्यं मम सन्निधानं ।
विचिंत्य चेत्थं मुनिनाहि साकम् ।
उवास चंद्रावर सततिस्यां ।
श्री चंद्रलांबा मनसा स्मरामि ।। २ ।।

ब्रह्मादि देवाश्च यदाश्रयेन् ।
सृष्ट्यादि कुर्वंति सलील यैव ।
उत्पत्ति रक्षा प्रलय प्रकर्त्री ।
श्री चंद्रलांबा मनसा स्मरामि ।। ३ ||

यस्याः कटाक्षातु नरानृलोके ।
मान्या गुणाढ्या शुचयो भवंति ।
ते सज्जनाः शीलावंता वरिष्ठा ।
श्री चंद्रलांबा मनसा स्मरामि ।। ४ ।।

इयं सरिन्मे जनकस्या गोत्पा ।
भीमेति चेमांच सरिब्दरासु ।
श्रेष्ठां करोमीति तटे वसंति ।
श्री चंद्रलांबा मनसा स्मरामि ।। ५ ।।

यत्पाद संसेववतो लभंते ।
चतुर्विधार्थान मनुजास्सुखेन ।
दीनर्तिहंत्रीं भजतां शरण्यां ।
श्री चंद्रलांबा मनसा स्मरामि ।। ६ ।।

भीमानुकूलेच सुमंदिराणां ।
मध्येस्थितां हुंदर गर्भगेहे ।
भक्तेष्ट दावी करुणार्द्र चित्तां ।
श्री चंद्रलांबा मनसा स्मरामि ।। ७ ।।

अष्टकं चंद्रला देव्याः पठेद्यः श्रद्धयान्वितः ।
धनधान्य समृद्धः स्थात पुत्रप्रौत्र समन्वितः ।
सर्व पाप विनिर्मुक्तः जीवेत्स शरदः शतम् ।